A

# SUMMATIVE ASSESSMENT-III - 2025-26 ( MODEL)

First Language Part I- Paper-I

**SANSKRIT**

(For Academic and Oriental Sanskrit Schools)

**Time 1 ½ Hours** **Class- X**

**Cool of time - 15. Minutes** **Max Score - 40**

**निर्देशाः -**

- 15 निमेषाः समाश्वासकालः ।
- प्रश्नान् निर्देशान् च सम्यक् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या ।

© STATE ASSESSMENT CELL - SCERT KERALA

## भागः - 1

**1. अधोदत्तेभ्यः गणेभ्यः विपरीतार्थकं गणं चित्वा लिखत ।** **(1)**

**क)** हलायुधः - बलरामः। **ख)** सूरजा - कालिन्दी ।

**ग)** सानुः - पर्वतः । **घ)** क्षीरम् - जलम् ।

**2. अधोदत्तपट्टिकां पठित्वा उचितरूपेण युक्तं गणं चित्वा लिखत ।** **(1)**

| | |
|---|---|
| १ तुमुन्नन्तम् । | **अ)** नत्वा |
| २ क्त्वान्तम् । | **आ)** चिराय |
| ३ ल्यबन्तम् । | **इ )** अधीत्य |
| | **ई)** भोक्तुम् |

**क)** १ - अ २ - ई ३ - आ

**ख)** १ - ई २ - अ ३ - आ

**ग)** १ - इ २ - आ ३ - ई

**घ)** १ - ई २ - अ ३ - इ

**3. प्रस्तावनाद्वयं पठत । अधोदत्तेभ्यः साधु उत्तरं किमिति लिखत ।** **(1)**

१. बालकः कथा रोचते ।

२. बालकाय कथा रोचते ।

**क)** १ साधु ।

**ख)** २ साधु ।

**ग)** १ , २ असाधु ।

**घ)** १ , २ साधु ।

4. **राधिका जन्मदिने विद्यालये एकं फलवृक्षम् अरोपयत् । अत्र कः मनोभावः प्रतिफलति?** **(1)**

**क)** अत्याग्रहः। **ख)** प्रकृतिस्नेहः

**ग)** स्वार्थता। **घ)** असहिष्णुता।

**भागः - 2**

5. **"पण्डिताः सम्यक् परीक्ष्य श्रेष्ठमेकं स्वीकुर्वन्ति" इति आशययुक्तं पद्यं चित्वा लिखत।** **(2)**

**क)**
सहसा विदधीत न क्रिया-
मविवेकः परमापदां पदम्।
वृणुते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः ॥

**ख)**
पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद्भजन्ते
मूढः परप्रत्ययनेयबुद्धिः॥

6. **खण्डिकां पठित्वा शत्रन्तपदं शानजन्तपदं च चित्वा लिखत।** **(2)**

मोहन्लालः अभिनयं कुर्वन् अस्ति। अतः एव जनहृदयेषु सः नक्षत्रमिव विराजमानः भवति।

7. **उदाहरणानुसारं समानसन्धियुक्तं पदं खण्डिकातः स्वीकृत्य पदच्छेदं कुरुत।** **(2)**

विद्याभ्यासं परिसमाप्य शिष्यः गुरुमुपगम्य अवदत् - गृहं गन्तुकामोऽहं गुरुदक्षिणां प्रदातुम् इच्छामि।

**उदा** - कर्मनिरतोऽहम् - कर्मनिरतः + अहम्।

**क)** ..................... - ..................+ ................. ।

**उदा** - तरुमुपलक्ष्य - तरुम् + उपलक्ष्य।

**ख)** ..................... - ..................+ ................. ।

8. **(I) अधोरेखाङ्कितपदमुत्तरत्वेन लब्धुं योग्यं प्रश्नं रचयत।** **(2)**

**[ प्रश्नवाचकपदानि - कथं, कम्, कः, कस्य ]**

**क)** विचारशीलानां जीवितम् **<u>आनन्दपूर्णं</u>** भवति।

**ख)** **<u>सञ्जयन्</u>** ओथल्लो नाम नाटकस्य कैरलीविवर्त्तनं कृतवान्।

**अथवा**

**(II) अधोदत्ते पदे उपयुज्य नूतनं वाक्यं रचयत।**

**क)** वदतु। ........................................................................ ।

**ख)** प्रवहति। ........................................................................ ।

9. **ऋते उपयुज्य वाक्यं परिवर्तयत।** **(2)**

**उदा -** उद्याने पाटलस्य ऋते सर्वाणि पुष्पाणि सन्ति।

© STATE ASSESSMENT CELL - SCERT KERALA

उद्याने **पाटलात् ऋते** सर्वाणि पुष्पाणि सन्ति।

**(क)** ग्रन्थालये लौकिकन्यायस्य ऋते अन्ये ग्रन्थाः सन्ति।

............................................................ ।

**10. निर्देशानुसारं लिखत।** **(3)**

**एकपदं लिखत।**

**क)** परम्परया आगतम् - ............................ ।

**ख)** भूमिं पालयति इति - ............................।

**विग्रहवाक्यं लिखत।**

**ग)** विज्ञानम् - ............................ ।

**11. निर्देशानुसारं वाक्यं परिवर्तयत।** **(3)**

**लङ् लकारे परिवर्तयत।**

**क)** पुत्रस्य पठनवैमुख्यं माता अध्यापकं वदति ।

**ख)** अध्यापकः परिहारार्थं गुडगुलिकान्यायेन गुणपाठकथां श्रावयति।

**लोट् लकारे परिवर्तयत।**

**ग)** भवान् गुणपाठकथापुस्तकं पठति।

**12. श्लोकं पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत।** **(4)**

कुलेन कान्त्या वयसा नवेन
गुणैश्च तैस्तैर्विनयप्रधानैः ।
त्वमात्मनस्तुल्यममुं वृणीष्व
रत्नं समागच्छतु काञ्चनेन ॥

**क)** श्लोकात् 'सुवर्णम्' इत्यर्थकं पदं चित्वा लिखत।

**ख)** श्लोकात् एकं क्रियापदं लिखत।

**ग)** श्लोकस्य आशयं स्ववाक्यैः लिखत।

**13. प्रादेशिकभाषया आशयानुसारं विवर्तयत।** (4)

महाकविना कालिदासेन विरचितं महाकाव्यं भवति रघुवंशम्। अस्मिन् काव्ये एकोनविंशति सर्गाः सन्ति। सूर्यवंशभूपालानां चरितमेव अस्य इतिवृत्तम्। रघोः चरितमेव विस्तरेण प्रतिपादयति इत्यतः काव्यमिदं रघुवंशमिति नाम्ना प्रसिद्धम्।

© STATE ASSESSMENT CELL - SCERT KERALA

**14. (I) सूचनानुसारं जीवनचरितं लिखत।** (4)

| | | |
|---|---|---|
| नाम | - | इन्नसेन्ट् |
| जन्म | - | 1948 फेब्रुवरि 28 तृश्शूर् |
| पितरौ | - | तेक्केत्तल वरीत् , मर्गलीत्त |
| कर्ममण्डलम् | - | चलच्चित्राभिनेता। |
| कृतयः | - | चिरिक्कुपिन्निल् , कान्सर् वार्डिले चिरि इत्यादयः |
| पुरस्कारः | - | केरलचलच्चित्रपुरस्कारः, केरलाफिलिंक्रिटिक्स् पुरस्कारः |
| मृत्युः | - | 2023 मार्च् 26 |

**अथवा**

**(II) खण्डिकां पठित्वा जीवनचरितरूपरेखां लिखत**

कैरलीचलच्चित्रमण्डले हास्यस्य नूतनवातायनं उद्घाटितवान् हास्यकलाकारः आसीत् अटूर् भासी। अयं 1927 मार्च् 1 तमे दिनाङ्के अटूर् ग्रामे ई. वि. कृष्णप्पिला- महेश्वरि अम्मा दम्पत्योः पुत्रत्वेन जनिमलभत। सः न केवलम् अभिनेता अपि तु पटकथाकारः, माध्यमप्रवर्तकः, गायकः, निदेशकः, चलच्चित्रनिर्माता च आसीत् । पञ्चशताधिकचलच्चित्रेषु अभिनयं कृतवान् कलाकारोऽयं केरलचलच्चित्रपुरस्कारं त्रिवारं प्राप्नोत्। रघुवंशं , अच्चारम् अम्मिणि ओशारम् ओमना, आद्यपाठम् इत्यादीनि अनेन निदेशितानि चलच्चित्राणि भवन्ति । अयं महानुभावः त्रिषष्टितमे वयसि 1990 मार्च् 23 तमे दिनाङ्के पञ्चत्वं गतः।

| | | |
|---|---|---|
| नाम | - | ........................................... |
| जन्म | - | ........................................... |
| पितरौ | - | ........................................... |
| कर्ममण्डलम् | - | ........................................... |
| पुरस्कारः | - | ........................................... |
| निदेशितचलच्चित्राणि | - | ........................................... |
| मृत्युः | - | ........................................... |

© STATE ASSESSMENT CELL - SCERT KERALA

**15. (I) तेय्यकलारूपम् अधिकृत्य लघुटिप्पणीं लिखत।** **(4)**

**श्रद्धेयाः अंशाः -** अनुष्ठानकला - दैवम् - कोलधारी - वाद्योपकरणानि - चतुर्विधाभिनयः - पूर्विकाणां स्मरणं- भूमावागता देवता।

**अथवा**

**(II) शाण्डिल्यस्य स्वभावनिरूपणं लिखत।**

**श्रद्धेयाः अंशाः -** भगवदज्जुकम् -हास्यकथापात्रम्- भोजनप्रियः - विकलवाक्यप्रयोगः - परिहासप्रियः।।

**16. (I) संभाषणांशान् पूरयत।** **(4)**

रश्मी - आचार्य ! अशोकस्तम्भे संस्कृतेन किमपि लिखितं दृश्यते ?

उदयनः - आम्, .................. इति किल ?

रश्मी - तत् किमर्थम् अत्र दत्तं भवति ?

उदयनः - तत् भारतसर्वकारस्य .................... भवति।

रश्मी - ध्येयवाक्यं वा ? तत् किम् ?

उदयनः - ध्येयवाक्यं नाम प्रत्येकं संस्थायाः लक्ष्यसूचकं वा उत्तरदायित्व सूचकं भवति।

रश्मी - केरल आरक्षकदलस्य ध्येयवाक्यं किम् ?

उदयनः - ......................... भवति। एतादृशानां ध्येयवाक्यानां चयनं करोतु।

रश्मी - .................... । यत्नं करोमि।

**अथवा**

**(II) हेन्ड्रिट् वान् रीड् 'होर्त्तूतूस् मलबारिक्कूस्' ग्रन्थस्य रचनायै इट्टि अच्युतम् उपगतवान् । तयोः सम्भाषणं संम्भाव्य लिखत।**

**** ** ****

© STATE ASSESSMENT CELL - SCERT KERALA